
# ಶ್ರೀಮದಾನನ್ದತೀರ್ಥಭಗವತ್ಪಾದಾಚಾರ್ಯಃ



Tracking:

| Sr | Date | Remarks | By |
|---|---|---|---|
| 1 | 01/03/2012 | **Typing Started on** | **H K SRINIVASA RAO** |
| 2 | 01/03/2012 | **Typing Ended on** | **H K SRINIVASA RAO** |
| 3 | 10/03/82012 | **I Proof Reading & Correction** | **M S Venugopal & H K Srinivasa Rao** |
| 4 | 14/08/2012 | **II Proof Reading & Correction** | **B S Pavan & H K Srinivasa Rao** |
| | | | |

## ॥ ಶ್ರೀ ಹಯವದನ ರಂಗವಿಠ್ಠಲ ಗೋಪೀನಾಥೋ ವಿಜಯತೇ॥

*Blessed by Lord and with His divine grace, we are pleased to publish this Magnanimous Work of sri Acharya Madhwa. It is a humble effort to make available this Great work to sadhakas who are interested in the noble path of propagating Acharya Madhwa's Philosophy.*

*With great humility, we solicit the readers to bring to our notice any inadvertant typographical mistakes that could have crept in, despite great care. We would be pleased to incorporate such corrections in the next versions. Users can contact us, for editable version, to facilitate any value additions.*

*Contact: H K SRINIVASA RAO, N0 26, 2ND FLOOR, 15TH CROSS, NEAR VIDHYAPEETA CIRCLE, ASHOKANAGAR, BANGALORE 560050. PH NO. 26615951, 9901971176, 8095551774, skype Id: SRKARC6070*

*Email :* **srkarc@gmail.com**

## ಕೃತಜ್ಞತೆಗಳು



ಜನ್ಮಾಂತರದ ಸುಕೃತದ ಫಲವಾಗಿ ಮಧ್ವಮತದಲ್ಲಿ ಜನಿಸಲು, ಪ್ರೇಮಮೂರ್ತಿಗಳಾಗಿ ನನ್ನ ಅಸ್ತಿತ್ವಕ್ಕೆ ಕಾರಣರಾದ, ಈ ಸಾಧನೆಗೆ ಅವಕಾಶಮಾಡಿದ, ನನ್ನ ಪೂಜ್ಯ ಮಾತಾ ಪಿತೃಗಳಾದ, ದಿವಂಗತರಾದ ಲಲಿತಮ್ಮ ಮತ್ತು ಕೃಷ್ಣರಾವ್ ಹೆಚ್ ಆರ್ ಅವರ ಸವಿ ನೆನಪಿನಲ್ಲಿ ಈ "ಸರ್ವಮೂಲ ಯಜ್ಞ"

"ಮಾತೃದೇವೋ ಭವ-ಪಿತೃದೇವೋಭವ-ಆಚಾರ್ಯದೇವೋಭವ"

ಗ್ರಂಥ ಋಣ:ಆಚಾರ್ಯ ಪ್ರಭಞ್ಜನರಿಂದ ಪ್ರಕಾಶಿತವಾದ ಸರ್ವಮೂಲ ಗ್ರಂಥಗಳು

## ॥ कथालक्षणम् ॥

नृसिंहमखिलज्ञानतिमिराशिशिरद्युतिम् ।
सम्प्रणम्य प्रवक्ष्यामि कथालक्षणमञ्जसा ॥ 01 ॥

वादो जल्पो वितण्डेति त्रिविधा विधुषां कथा ।
तत्त्वनिर्णयमुद्दिश्य केवलं गुरुशिष्ययोः ॥ 02 ॥

कथाऽन्येषामपि सतां वादो वा समितेः शुभा ।
ख्यात्याद्यर्थं स्पर्धया वा सतां जल्पइतीर्यते ॥ 03 ॥

वितण्डा तु सतामन्यैस्तत्त्वमेषु निगूहितम् ।
स्वयं वा प्राश्निकैर्वादे चिन्तयेत् तत्त्वनिर्णयम् ॥ 04 ॥

रागद्वेषविहीनास्तु सर्वविद्याविशारदाः ।
प्राश्निका इति सम्प्रोक्ता विषमा एक एव वा ॥ 05 ॥

अशेषसंशयच्छेत्ता निःसंशय उदारधीः ।
एकश्चेत् प्राश्निको ज्ञेयः सर्वदोषविवर्जितः ॥ 06 ॥

एको वा बहवो वा स्युर्विष्णुभक्तिपराः सदा ।
विष्णुभक्तिर्हि सर्वेषां सद्गुणानां स्वलक्षणम् ॥ 07 ॥

पृष्टेनागम एवादौ वक्तव्यः साध्यसिद्धये ।
नैषा तर्केणापनेया मतिरित्याह हि श्रुतिः ।
अन्यार्थ एवागमस्य वक्तव्यः प्रतिवादिना ॥ 08 ॥

ऋग्यजुःसामाथर्वाश्च भारतं पञ्चरात्रकम् ।
मूलरामायणं चैव सम्प्रोच्यन्ते सदागमाः ॥ 09 ॥

अनुकूला य एतेषां ते च प्रोक्ताः सदागमाः ।
अन्ये दुरागमा नाम तैर्न साध्यं हि साध्यते ॥ 10 ॥

स्वपक्ष आगमश्चैव वक्तव्यः प्रतिवादिना ।
तस्याप्यन्यार्थता साध्या वादिना स्वार्थसिद्धये ॥ 11 ॥

अन्यार्थता निराकार्या स्वागमस्य विनिश्चयात् ।
उपपत्त्यवकाशोऽत्र ह्यागमार्थविनिर्णये ॥ 12 ॥

वाद्यागमार्थे निर्णीत आगमार्थः परस्य तु ।
निर्णेयः सहितैः पश्चात् ततो निःशेषनिर्णयः ॥ 13 ॥

प्रत्यक्षसिद्धेष्वर्थेषु प्रश्ने मामक्षजं वदेत् ।
ज्ञानं वा ज्ञानसिद्धेषु नानुमां प्रथमं वदेत् ॥ 14 ॥

परतुष्टिकरं वाक्यं वदेतां यदि वादिनौ ।

स एवात्रागमो ज्ञेयः परतुष्टिर्हि तत्फलम् ॥ 15 ॥

एवं निर्णयपर्यन्तं वादे सुबहवोऽपि हि ।

घटेयुश्चिरकालं च जल्पे यावत् परो जितः ॥ 16 ॥

तत्त्वनिर्णयवैलोम्यं वादे साक्षात् पराजयः।

संवादे श्लाघ्यतैव स्याद्गुरुत्वमितरस्य च ॥ 17 ॥

तत्त्वनिर्णयवैलोम्ये निन्द्यो दण्ड्योऽथवा भवेत् ।

विरोधासङ्गतिन्यूनतूष्णीम्भावादिकैर्जितः ॥ 18 ॥

भवेज्जल्पे वितण्डायां न्यायो जल्पवदीरितः ।

संवादे दण्ड्य ता न स्याद्वितण्डाजल्पयोरपि ॥ 19 ॥

पराजितत्वमात्रं स्यान्निन्द्यो दण्ड्योऽपि वाऽन्यथा ।

अनुवादादिराहित्यं नैव जल्पेऽपि दूषणम् ॥ 20 ॥

विद्याहीनत्वलिङ्गेऽपि वादिनोः स्यात् पराजयः ।

तदभावान्नैव षड्कादन्यो निग्रह इष्यते ॥ 21 ॥

अन्तर्भावादिहान्येषां निग्रहाणामिति स्म ह ।

विद्यापरीक्षापूर्वैव वृत्तिर्जल्पवितण्डयोः ॥ 22 ॥

स्खलितत्वादिमात्रेण न तत्रापि पराजयः ।

वादजल्पवितण्डानामिति शुद्धं स्वलक्षणम् ॥ 23 ॥

आनन्दतीर्थमुनिना ब्रह्मतर्कानुसारतः ।

कथालक्षणमित्युक्तं प्रीत्यर्थं शार्ङ्गधन्वनः ॥ 24 ॥

सदोदितामितज्ञानपूरवारितहृत्तमाः ।

नरसिंहः प्रियतमः प्रीयतां पुरुषोत्तमः ॥ 25 ॥

॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्य विरचितं कथालक्षणम् ॥

॥ श्री कृष्णार्पणमस्तु ॥

॥ मुख्यप्राणवशे सर्वं स विष्णोर्वशगः सदा ॥

॥ प्रीणयामो वासुदेवं देवतामण्डलाखण्डमण्डानम् ॥